तथात्वे वर्द्धमानादौ प्रतिमासासानुपपत्तेः। एवमेव श्राद्धविवेकः। अतएव तत्रैवामावास्याव्यतिरिक्त-कृष्णपक्षविहितपार्व्वणश्राद्धे यथास्तमिति वचनात् व्यवस्थेयुक्तं। तत्र सामिकर्त्तव्यत्वाविशेषिता-मावास्याव्यतिरेकाभिधानात् क्षीणादिभेदेन व्यवस्था सामिनिरग्निसाधारणीत्यवगम्यते। एवञ्चामावास्यायां मृताहनिमित्तक औरसक्षेत्रजपुत्र-कर्त्तव्यपार्व्वणे क्षीयमाणादिना न व्यवस्था किन्तु यथास्तमित्यनेन। एतद्दिव्तं मलमासतत्त्वे ॥ * ॥ यत्तु दशममुहूर्त्तस्य मत्स्यपुराणोक्तापराह्णिकत्वेऽपि श्राद्धे तस्य त्यागः। पितृपितृव्यर्थं एवेति वासरतृतीयांशाभिधानं सामिपरमेवेति परिशिष्टप्रकाशोक्तं तन्न युक्तं। पूर्व्वाह्णो वै देवानां मध्यं दिनं मनुष्याणां अपराह्णः पितॄणां इति श्रुत्या तन्मुहूर्त्तस्य मनुष्यकर्म्माङ्गत्वेन बोधनादेव श्राद्धे परित्यागः। एतच्छ्रुतिमूलकमेव वासरस्य तृतीयांश इत्युक्तं। वासरस्य तृतीयांशे त्रिधा विभक्तस्य दिनस्य तृतीयभागे नातिसन्ध्यासमीपत इति सन्ध्यासमीपैकमुहूर्त्तं आपद्यपि वर्ज्जनीय इत्यर्थः। तेन।

"प्रातःकालो मुहूर्त्तांस्त्रीन् सङ्गवस्तावदेव तु।
मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णस्ततः परं ॥
सायाह्नस्त्रिमुहूर्त्तः स्यात् श्राद्धं तत्र न कारयेत्।
राक्षसी नाम सा वेला गर्हिता सर्व्वकर्म्मसु" ॥

इति मत्स्यपुराणे निषिद्धमुहूर्त्तत्रये आपदि मुहूर्त्तद्वयमभ्यनुज्ञातं अतिशब्दस्वरसात्। "त्रिमुहूर्त्तापि कर्त्तव्या पूर्व्वा दर्शा च बह्वृचैः"। इति हारीतवचनाच। तेन पूर्व्वदिने मुहूर्त्तत्रयमात्रलाभे परदिने वासरस्य तृतीयांशालाभे पूर्व्वदिने एव श्राद्धं। एतेन नातिसन्ध्यासमीपत इत्यनेन राक्षसीवेलामात्रं निषिध्यत इति मैथिलमतमपास्तं। सर्व्वकर्म्मसु स्नानदानादिष्वपि अनापदीत्यर्थः। इति श्राद्धविवेकः ॥ तेनाशक्तौ तस्यामपि तत्करणं। अतएव पराशरः।

"दिवाकरकरैः पूतं दिवास्नानं प्रशस्यते।
अप्रशस्तं निशि स्नानं राहोरन्यत्र दर्शनात्" ॥

इति ॥ * ॥ दर्शद्वैधे कुत्र श्राद्धमित्याह छन्दोगपरिशिष्टे कात्यायनः।

"यदा चतुर्द्दशीयामं तुरीयमनुपूरयेत्।
अमावास्या क्षीयमाणा तदैव श्राद्धमिष्यते" ॥

चतुर्द्दशीयामं चतुर्द्दशीसम्बन्धिदिनयाममिति तद्दिनस्यामावास्यासम्बन्धेऽपि चतुर्द्दशीनिर्द्देशोऽधिकेन व्यपदेशा भवन्तीति न्यायात्। तेन यदा अमावास्याचतुर्द्दशीसम्बन्धिदिनस्य चतुर्थं प्रहरं कृत्स्नं किञ्चिन्न्यूनं वा अनुपूरयेत् अत्रानुपूरयेदित्यभिधानात् तुरीययामस्य पादोनदण्डद्वयान्यूनप्रथममुहूर्त्तस्य बहुकालत्वं प्रतीयते। एतेन प्रहरत्रयाभ्यन्तरे किञ्चिदधिकप्रहरत्रये वा चतुर्द्दशी प्रतीयते। ततश्चोभयवासरीयतृतीयांशसम्बन्धिपञ्चधाविभक्तापराह्णमुहूर्त्तयोर्मुहूर्त्तान्यूनदर्शलाभे द्वैधं न त्वेकदिनमात्रे तल्लाभे। तत्र पूर्व्वाह्णेन वासरस्य तृतीयांश इत्यनेनैव द्वैधा-

नुदयात्। अतो यद्दिने वासरतृतीयांशे तादृशदर्शलाभस्तत्रैव श्राद्धं। मुहूर्त्तोनतिथेस्तु कर्म्मानर्हत्वान्न द्वैधावसरः। तथा च भविष्ये।

"व्रतोपवासनियमे घटिकैका यदा भवेत्।
सा तिथिः सकला ज्ञेया पित्रर्थे चापराह्णिकी"॥

इति। अत्र च प्रागुक्तशावालिवचनेोक्ता मुहूर्त्तात्मिका घटिका ग्राह्या योग्यत्वात् न त्वेकदण्डात्मिका। वक्ष्यमाणरौहिणादियुक्ते तथा दृष्टत्वाच। ततश्च पूर्व्वोक्तद्वैधे तद्दिवसीयचतुर्द्दश्यपेक्षया परदिने अमावास्या क्षीयमाणा न्यूनकालव्यापिनी न तु पूर्व्वापरदिवसीययावच्चतुर्द्दश्यपेक्षया अनुपस्थितेः। एवं स्तम्भितावर्द्धमानयोरपि। तदैव पूर्व्वदर्शे एव श्राद्धं। स्वोक्तचन्द्रक्षयानुरोधात्। यदा त्रिंशद्दण्डात्मकदिवसे चतुर्द्दश्यधिकचतुर्थयामपूरणे मुख्यापराह्णीयकिञ्चिन्न्यूनमुहूर्त्तलाभस्तदापि तदैवेत्यनेन चन्द्रक्षयानुरोधात् पूर्व्वदिने श्राद्धं न तु मुख्यापराह्णीयमुहूर्त्तलाभेऽपि परदिने। अत्र चन्द्रक्षयश्चतुर्द्दश्यष्टमयामात् प्रभृति अमावास्यासप्तमयामपर्य्यन्तमिति वक्ष्यते। तदैवेत्येव अवणात्तिथिद्वैधे खण्डविशेषो नियम्यते कर्म्मणि खण्डान्तरव्युदासाय। एवञ्च यत्र पूर्व्वापरदिने वासरतृतीयांशीयमुख्यापराह्णे मुहूर्त्तोनदर्शलाभस्तत्रापि पूर्व्वदिन एव श्राद्धं वासरतृतीयांशचन्द्रक्षयातिशब्दस्वरसात्। त्रिमुहूर्त्तापीत्यनुरोधाच। यत्र तु पूर्व्वदिने त्रिमुहूर्त्तमात्रव्यापिन्यमावास्या परदिने तृतीयांशमुहूर्त्तव्यापिनी सती क्षीयमाणा तत्र परदिने चन्द्रक्षयाभावेऽपि मुख्यापराह्णलाभात् श्राद्धम्। अन्यथा,—

"यदा चतुर्द्दशीयामं तुरीयमनुपूरयेत्"।

इति विशेषाभिधानं व्यर्थं स्यात् ॥ * ॥ अथ "यत्र पूर्व्वाह्णे श्राद्धं तत्र यदहस्त्वेव चन्द्रमा न दृश्येत ताममावास्यां कुर्व्वीत" इति गोभिलविरोधः। तथाविधचतुर्द्दशीयुक्तामावास्यायाः सिनीवालीत्वेन प्रातश्चन्द्रदर्शनात्। तत्राह स एव।

"यदुक्तं यदहस्त्वेव दर्शनं नेति चन्द्रमाः।
तत्क्षयापेक्षया ज्ञेयं क्षीणे राजनि चेत्यपि" ॥

"यदहस्त्वेव चन्द्रमा न दृश्येत तामामावास्यां कुर्व्वीत" इति यद्गोभिलसूत्रं तच्चन्द्रक्षयाभिप्रायिकम्। अन्यथा गोभिलीयतादृशसूत्रान्तरेण सह पौनरुक्त्यापत्तेः। तस्मात् प्रथमसूत्रं कृष्णपरं तत्र वर्द्धमानापक्षे नियतं। क्षीणास्तम्भितयोस्तु यथायोग्यमनुसरणीयम्। एवञ्च "यदहस्त्वेव चन्द्रमा न दृश्येत तामामावास्यां कुर्व्वीत" इति श्रुतिरेतत्समानार्थकं श्रुत्यन्तरं वा तदपि वर्द्धमानादिपरं न तु कात्यायनवचनात्तत्र क्षयलक्षणा कल्पतरुप्रभृतिभिरुक्तायुक्ता।

"श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसि"।

इति विरोधात्। क्षीणे इति कात्यायनेन यत् क्षीणे राजनीत्युक्तं तदपि क्षयाभिप्रायकम्। अथैवं दृश्यमानेऽप्येकदा इति यद्गोभिलस्य सूत्रान्तरं तदर्थम्। "यदहस्त्वेव" इत्यादि द्वितीय-

सूत्रप्राप्ततिथेः सिनीवालीत्वेनैव चन्द्रदर्शनप्राप्तेरित्यत आह स एव।

"यश्चोक्तं दृश्यमानेऽपि तच्चतुर्द्दश्यपेक्षया।
अमावास्यां प्रतीक्षेत तदन्ते वापि निर्व्वपेत्" ॥

दृश्यमानेऽप्येकदेति यदुक्तं तच्चतुर्द्दशीं श्राद्धाय पूर्व्वसूत्रममावास्यापदोपादानाच्चन्द्रक्षये सत्यममावास्याविषयं। इदं पुनरित्यम्भूतचतुर्द्दशीविषयमिति श्राद्धविवेकः। तत् किममावास्यात्रचतुर्द्दशीत्याह अमावास्यां प्रतीक्षेत उभयतिथिप्राप्तौ श्राद्धायामावास्या प्रतीक्षणीया। यत्र पूर्व्वदिने दिवा सार्द्धमुहूर्त्तमात्रे अमावास्या परदिने च सार्द्धदशममुहूर्त्तमात्रे तत्र चोभयदिने श्राद्धयोग्यामावास्या न प्राप्यते तत्र तदन्त चतुर्द्दश्यन्ते निर्व्वपेत् दद्यात् ॥ * ॥ अत्रैव विषये सामिनिरग्न्योर्व्विशेषमाह कालमाधवीये शाबालिः।

"अपराह्णद्वयाव्यापी यदि दर्शस्तिथिक्षये।
आहिताग्नेः सिनीवाली निरग्न्यादेः कुहूर्म्मता" ॥

आदिशब्दादनुपनीतशूद्रगोग्रहणं ॥ * ॥ क्षयमाह कात्यायनः।

"अष्टमेऽंशे चतुर्द्दश्याः क्षीणो भवति चन्द्रमाः।
अमावास्याष्टमांशे च ततः किल भवेदणुः" ॥

चतुर्द्दश्यष्टमे यामे चन्द्रमाः क्षीणः चतुर्थभागोनकलावशिष्टो भवति। "अत्रेन्दुराद्यप्रहरेऽवतिष्ठते" इत्यादिस्वरसात्। अमावास्याष्टमे यामे चाणुर्भवति पुनरुत्पद्यते किलेत्यागमवार्त्तायां तेन अमावास्यायाः सप्तमे यामे कृत्स्नक्षय इत्यवगम्यते। "ततश्चान्यकलावयवनाशोत्पत्तिरेव क्षयः सा च सूक्ष्मतायां विनाशेऽप्यस्तीति" श्राद्धविवेकः॥ उत्पत्तिराद्यक्षणसम्बन्धः। तेन विनाशस्यानन्तत्वेऽपि नातिव्याप्तिः ॥ * ॥ अत्र विशेषमाह स एव।

"आग्रहायण्यमावास्या तथा ज्यैष्ठस्य या भवेत्।
विशेषमाभ्यां ब्रुवते चन्द्रचारविदो जनाः" ॥

आभ्यामिति ल्यब्लोपे पञ्चमी इमे प्राप्येत्यर्थः। चन्द्रचारविदो ज्योतिर्व्विदः। अत्र पौर्णमास्यान्तमास इति परिशिष्टप्रकाशः॥ अत्र बीजं ब्रह्मपुराणीयतिथिकृत्यं। तथा च श्राद्धमधिकृत्य ब्रह्मपुराणं।

"पयोमूलफलैः शाकैः कृष्णपक्षे च सर्व्वदा"।

अत्र कृष्णपक्षे चतुर्द्दशीव्यतिरिक्तायां यस्यां कस्याञ्चित् तिथौ श्राद्धविधानादमावास्यापि लभ्यत इति ॥ * ॥ को विशेषइत्याह स एव।

"अत्रेन्दुराद्ये प्रहरेऽवतिष्ठते
चतुर्थभागोनकलावशिष्टः।
तदन्त एव क्षयमेति कृत्स्न-
मेवं ज्योतिश्चक्रविदो वदन्ति" ॥

अत्र मासद्वये अमावास्यायां चतुर्थभागोनकलावशिष्टः चतुर्थभागोना या कला तयावशिष्टः कलाभागत्रयमात्रः सन्नाद्ये प्रहरेऽवतिष्ठते। अर्थात् चतुर्द्दश्यष्टमयामे क्षयारम्भ इति। तदन्त एव अमावास्यान्त्ययाम एव क्षयं कृत्स्नमेति। अन्य-